प्रथमपुटस्य शेषभागः **श्रीसोमनाथ-सौराष्ट्र-संस्कृत-विश्वविद्यालये त्रिदिवसात्मकं....**

सूत्रधार-संयोजन-रूपिणी आसीत्।



अवसरेऽह्यस्मिन् समुपस्थितेषु संस्कृत-विद्वर्येषु अन्यतमेन महामहोपाध्यायेन आचार्येण शिवजी-उपाध्याय-महोदयेन स्व-रचितम् अभिनन्दन-चित्र-फलकमेकं स्वीय-करकमलाभ्यां समर्प्य श्रीसोमनाथ-सौराष्ट्र-संस्कृत-विश्वविद्यालयस्य कुलपतिः प्राचार्यः अर्कनाथ-चौधरी सस्नेहं सादरञ्च अभिनन्दितः।

संस्कृत-सम्मेलनेऽह्यस्मिन् आहत्य प्रायेण सार्ध-चतुश्शतं शोधपत्राणि संप्रस्तुतानि।

# 'अनासक्ति-योगः' इति संस्कृत-ग्रन्थः गुजरातस्य महामहिमशालिना राज्यपालेन डो.ओ.पी.कोहलीवर्येण लोकाय समर्पितः।

डॉ. बलदेवानन्द-सागरः

'श्रीमद्-भगवद्-गीता' नाम योगेश्वर-श्रीकृष्णार्जुनसंवाद-रूपः



ज्ञानमयः प्रदीपः, भगवता बादरायणेन व्यासेन 'महाभारते' प्रज्वाल्य, अशेषमानवतायाः लाभार्थम् उपायनीकृतोऽह्यस्ति। परमोपकारकमिदं भगवद्-गीतम् आधृत्य अनेकैः विद्वद्भिः भाष्यकारैः चिन्तकैः विचारकैः विश्वनेतृभिश्च काले काले विविधाः टीकाः, विविधानि भाष्याणि च विविधासु भाषासु विरचितानि। तेषु अन्यतमेन राष्ट्रपित्रा महात्मगान्धिना मोहनदास-करमचन्द-गान्धिना 'अनासक्ति-योगः' इति स्वीय-जीवनाचरणस्य अनुभवाधारेण विरचितं सरलं सर्वजनोपयोगि च गुजराती-भाषिकं भाष्य-जातमतितरां विलसति आधुनिके जगति। अधुनावधि गुजराती-भाषिकस्य 'अनासक्ति-योग' स्य सार्द्धैक-लक्षाधिक-प्रतयः विक्रीताः जाताः। ततः परं अपरासु अनेकासु भाषासु अनूदितोऽयं ग्रन्थः सुख्यातेन संस्कृत-विदुषा महामहोपाध्येन आचार्येण डो.गौतम-पटेलेन साम्प्रतं संस्कृत-भाषायां अनूदितः, उत्तराखण्ड-विश्वविद्यालयेन च प्रकाशितः। स च 'अनासक्ति-योगः' इति संस्कृत-ग्रन्थः अमदावादे राजभवने वैशिष्ट्येन समुपकल्पिते एकस्मिन् समारोहे गुजरातस्य महामहिमशालिना राज्यपालेन डो.ओ.पी.कोहलीवर्येण लोकाय समर्पितः। अवसरेऽह्यस्मिन् समुपस्थितेषु विशिष्टजनेषु 'श्रीसोमनाथ--संस्कृत-विश्वविद्यालयस्य कुलपतिः प्रो.अर्कनाथ चौधरी, उत्तराखण्ड-विश्वविद्यालयस्य कुलपतिः प्रो.महावीर-अग्रवालः, संस्कृत-सेवा-समितेः संस्थापकाध्यक्षः, महामहोपाध्यायः डो.गौतम-पटेलः, साबरमतीस्थस्य गान्धि-आश्रमस्य सचिवः श्री-अमृतभाई-मोदी चान्यतमाः आसन्।....

# झारखण्डस्य देवघरे संस्कृतविश्वविद्यालयस्थापना

रांच्यां केन्द्रसर्वकारेण झारखण्डस्थे पावने देवघरे संस्कृतविश्वविद्यालय स्थापनाप्रस्तावे सहमतिः प्रकटिता। केन्द्रियमानवसंसाधनमविकासमन्त्री स्मृति ईरानी-मुख्यमन्त्रिरघुवरदायोः उपस्थितौ देहल्यां प्रस्तावोऽयं पालितः।

अवसरेऽस्मिन् झारखण्डस्य शिक्षामन्त्री डॉ नीरा यादवेन सहानेके पदाधिकारिणः समुपस्थिता अभूवन्। अधिवेशनेऽस्मिन् झारखण्डस्य शिक्षास्तरोन्नयनाय बहवः प्रस्तावाः पालिताः। श्रीरघुवरदासेन कथितं यत् राज्याय अनेके उपहारा केन्द्रसर्वकारेण प्रदत्ताः। संस्कृतविश्वविद्यालयस्थापनानन्तरं धनवादस्थिते आईएमसंस्थाने अस्मिन्नेव सत्रे आईआईटीशिक्षणं भविष्यतीत्यपि सूचितम्।

# अष्टवर्षीयां द्रष्टिहीन-जेहरां कण्ठस्था गीता श्लोकाः



अष्टवर्षीया जेहरा द्रष्टिहीना परन्तु सा अलौकिकी बुद्धियुक्ता तस्या हृदयस्य नेत्रे उद्घटिते जेहरा राम-रहीम-कृष्ण-करीम एतेषु भेदः न करोति, जेहरां गीतायाः बहवः श्लोकाः कण्ठस्थाः सन्ति, अस्यां बालिकायां आश्चर्यमयं आत्मविश्वासमस्ति एषा वदति अहं माद्रशानां द्रष्टिहीनानां बालकानां शिक्षयिष्यामि अस्याः पिता रईस-हैदरः माता शहीनश्च जेहरां प्रति स्वाभिमानं दर्शयतिः देहल्यां ढाबा इति भोजनालयं चालयति श्रीरईसस्य त्रीषु अपत्येषु तृतीया इयं जेहरा एषा जेहरा भावेन करबद्धदाञ्जलया गीता-श्लोकान् श्रावयति।

# बौद्ध विचारधारायाः हिन्दूत्व-वैरुध्य प्रयोगनुचितम्-डॉ. कोइनाड ऐल्त्स

नवदेहली। बहुधा बौद्ध धर्मस्य विचारधाराया प्रयोगः हिन्दुत्व विचारधारायै एकामस्त्रं रूपेण क्रियते। केचन लेखकाः हिन्दुत्वं समस्यामूलकं मत्वा बौद्धधर्मं तस्य निराकरण्स्य पर्याम् अमन्यन्त। अनुचितोऽयम् वर्तते। विचारोऽयं बेल्जियमस्य हिन्दुवादी चिंतकः प्रखरः लेखकः च डॉ. कोइनाल्ड ऐल्त्स महोदयः नवदेहल्यांमायोजितामेकां संगोष्ठ्यां व्यक्तं कृतवन्तः। संगोष्ठ्यैषा वैदिक धर्मः बौद्धधर्मश्य इत्यस्मिन् विषयोऽपरि आसीत्। अस्या संगोष्ठ्याः आयोजनं वेव्स मानवाभ्युद संस्थानस्य च संयुक्त तत्वावधानेनायोजितम भवत्। डॉ. कोइनाड ऐल्त्स हिन्दू धर्मस्य व्यापकं प्राचीनतमं च कार्यकालं वर्णयन् अकथयत् यत् बौद्धधर्मं हिन्दुत्वस्य पर्याय चिन्तनमतर्कसंगतम्। हिन्दूत्वस्य चिन्तनं वैदिककालं आर्यसमाजं रामकृष्णमिशनस्य च विचाराधाराः स्वान्ते समाहितं सम्पूर्ण भारत वर्षस्य प्रतिनिधित्वं करोति। हिन्दूधर्म संप्रेषयमाणा प्राचीनतमा भाषा संस्कृतं देशस्य अन्य प्रादेशिक भाषाः सम्पोषितवती। वैदिक संस्कृति भारतीयतायाः परिचायिका वर्तते। सत्यमिदं यत् बौद्धधर्मस्य जैन धर्मस्य च शिक्षाः जातिवादातितरा इच्छाविमुखा शान्तेः मार्गं च प्रशस्तं करोति। परं सामाजिकोत्थाने वैदिकधर्मस्य शिक्षाणाम् सकारात्मक प्रभावं वर्तते।

शेषभागःषष्टमपुटे

